दिनाङ्क :- 06.06.2025 सायम् :- 06:20

**मुख्यवार्ता:**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत्, अधुना भारतं काश्मीरतः कन्याकुमारीपर्यन्तं रेलमार्गेण पूर्णतया सम्बद्धम् अस्ति; तेन जम्मू-कश्मीर्-प्रदेशयोः चेनाब्-अञ्जी-सेत्वोः उद्घाटनम् कृतम्।
- कटरा-श्रीनगरयोः मध्ये सम्पर्कं कल्पयतः वंदेभारत्-एक्स्प्रेस्-रेलयानानि अपि प्रधानमन्त्रिणा हरित ध्वजप्रदर्शनपूर्वकं उद्घाटितानि; जम्मू-कश्मीरस्य विकास-परियोजनाः भारतस्य एकतायाः इच्छाशक्तेश्च महान् उत्सवः अस्तीति तेनोक्तम्।
- भारतीय-रिजर्व्-बैंक इत्यस्य मौद्रिक-नीति-समितिः अद्य नीतिगत-रेपोदराख्ये मूल्ये पञ्चाशदाधाराङ्कान् न्यूनीकृत्य सार्धपञ्चप्रतिशतं कर्तुं निश्चितवती।
- अस्य वर्षस्य NEET-PG इति परीक्षा अगस्तमासस्य तृतीये दिनाङ्के भविष्यति
- अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्प् आभियांत्रिक-महद्धनी एलेन् मस्क् इत्येतयोः मनोविभेदेन टेस्ला-संस्थायाः विपणिमूल्येषु सार्धैकशतम् बिलियन्-डालर्-तोऽधिकम् न्यूनीभूय एकदिवसीया बृहत्तमा हानिः सञ्जाताऽस्ति।

**प्रधानमंत्री-कश्मीर:**

कश्मीरतः कन्याकुमारीपर्यन्तं देशः अधुना रेलमार्गेण सम्बद्धः अस्ति इति वक्तव्यम् अद्य जम्मू-कश्मीरस्य कटरा-नगरे चेनाब्, अञ्जी-खाद्-सेत्वोः उद्घाटनानन्तरम् प्रधानमन्त्रिणा नरेन्द्रमोदिना दत्तम्। अवसरेऽस्मिन् सः षट्चत्वारिंशत्सहस्र- कोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासम्, उद्घाटनं, राष्ट्राय समर्पणं च कृतवान्। जनसमूहं सम्बोधयन् सः अवदत् यत् एताः विकासपरियोजनाः जम्मू-कश्मीरस्य प्रगतिं नूतनीयां गतिं प्रदास्यन्ति इति। सः जम्मू-कश्मीरं भारतस्य मुकुट-रत्नम् इति वर्णितवान्, चिनाब्-अञ्जी-सेतू जम्मू-कश्मीरस्य समृद्धेः द्वाररूपेण कार्यं करिष्यतः इति च स: अवोचत्। अद्यतनः कार्यक्रमः भारतस्य एकतायाः इच्छाशक्तेश्च विशालः उत्सवः अस्तीति सः अवदत्। प्रधानमन्त्री इत्यपि अवदत् यत्, दुर्भाग्येण, अस्मत्प्रतिवेशी देशः मानवतायाः, जनसामान्यान्यस्य च जीवनं विरुध्य कार्यमाचरति। सः एप्रिल् मासस्य द्वाविंशे दिनाङ्के पहलगामिमिति क्षेत्रे घटितघटनायाः उदाहरणम् उल्लिखितवान्। श्रीमोदी अवदत् यत् पाकिस्तान्-देशः पहलगाम्-क्षेत्रे मानवीयतया सह कश्मीरियत् इत्यस्योपर्यपि आक्रमणम् अकरोत्, पर्यटनक्षेत्रमिदं लक्ष्यीकृत्य तेनोक्तं यत् पर्यटनमिदम् कश्मीरी-कुटुम्बकेभ्यः जीविकां प्रददातीति। श्रीमोदी अद्य जम्मू-कश्मीराभ्यां द्वे नूतने वंदेभारतेति रेलयानेऽपि अघोषयत्। चेनाब्-अञ्जी-सेत्वो: उद्घाटनानन्तरं सः स्मारकमुद्राणां, मुद्राङ्कानां च विमोचनं कृतवान्।

**प्रधानमन्त्री-युवा**

प्रधानमन्त्री-नरेन्द्र मोदी अद्य भारतस्य यूनां वैश्विक-उपलब्धीः इति आरेखितवान्। तेनोक्तं यत् देशस्य युवान: वैश्विकरूपेण उल्लेखनीयं कार्यं कुर्वन्तः सन्तीति। केन्द्रस्य एन्. डी. ए-प्रशासनस्य एकादशवर्षपूर्तौ श्रीमोदी युवानः गतिशीलतायाः, नवान्वेषणस्य, दृढनिश्चयस्य च प्रतीकाः सन्तीति वर्णितवान्। गतैकादश-वर्षेषु राष्ट्रस्य विकासः युवशक्तेः अतुल्यशक्त्या दृढनिश्चयेन च प्रेरितः अस्ति। सामाजिक-प्रसार-लेखने श्रीमोदिना लिखितं यत्, देशे युवानः विविधक्षेत्रेषु अकल्पनीयं कार्यं कृतवन्तः इति।

**आर्. बि. आई. मूल्यापचितिः**

भारतीय-रिजर्व्-बैंक इत्यस्य मौद्रिक-नीति-समितिः अद्य नीतिगत-रेपोदराख्ये मूल्ये पञ्चाशदाधाराङ्कान् न्यूनीकृत्य सार्धपञ्चप्रतिशतं कर्तुं निश्चितवती। एम्. पी. सी. इत्यस्य अग्रिमोपवेशनम् अस्मिन् वर्षे अगस्त-मासस्य चतुर्थतः षड्-दिनाङ्कपर्यन्तं भविष्यति।

**सर्वोच्च न्यायालय-नीट**

सर्वोच्चन्यायालयेन राष्ट्रियपरीक्षा-मण्डलाय अस्य वर्षस्य आगस्ट्-मासस्य तृतीये दिनाङ्के नीट.-पी. जी. इति परीक्षा एकवारमेव कर्तुं अनुमतिः प्रदत्ता। प्रारम्भे परीक्षा जून्-मासस्य पञ्चदश- दिनाङ्के निर्धारिता आसीत्। न्यायमूर्तयः प्रशान्त् कुमार् मिश्रा तथा अगस्टीन् जार्ज् मासिह् इत्येतयोः पीठः निर्णयोऽयमयच्छत्।

**जयशंकर मध्य एशिया :**

विदेशमन्त्री डॉ. एस. जयशंकरः अद्य मध्यैशियायाः राष्ट्रेभ्यः भारताय प्रदत्त-समर्थनेन सहैव पहलगामे जघन्यातङ्क्याक्रमणस्य निन्दायै चापि कृतज्ञतां प्रकटितवान्। नवदिल्ल्यां भारत-मध्य-एशिया-संवादस्य चतुर्थोपवेशनं सम्बोधयन् डॉ. जयशंकरः अवदत् यत् मध्यैशिया-

देशानां कृते भारतदेशः विश्वसनीयः विकासे सहभागी च वर्तते इति। भारत-मध्य-एशिया-संवादे कजाकिस्तान-किर्गिज-गणराज्य-ताजिकिस्तान-तुर्कमेनिस्तान-उज्बेकिस्तान इति च देशानां विदेशमन्त्रिणः भागं गृह्णन्ति।

**सर्वदलीयप्रतिनिधिमण्डलम् :**

भाजपेति दलस्य सांसदस्य रविशंकरप्रसादस्य नेतृत्वे सर्वदलीयप्रतिनिधिमण्डलं जर्मनीदेशस्य बर्लिननगरं प्राप्तम्। प्रतिनिधिमण्डलस्य स्वागतं जर्मनीदेशे भारतीयराजदूतः अजीतगुप्ते इत्यनेन कृतम्। चर्चासु भारत-जर्मनी-सम्बन्धानां समाकलनेन सह सामरिकसहभागिता-विस्तारः, व्यापार-निवेशः, रक्षा, विज्ञान-प्राविधिक-गतिशीलता च चर्चाबिन्दुषु प्रमुखभूताः आसन्। सम्प्रति काङ्ग्रेस-दलस्य सांसदस्य शशि-थरूरस्य नेतृत्वे सर्वदलीय-प्रतिनिधिमण्डलं गतरात्रौ वाशिङ्गटन-नगरे पञ्चराष्ट्राणां यात्रायाः अन्तिमे चरणे अमेरिकी-उपराष्ट्रपतिना जे.डी.वैन्स्-इत्यनेन सह मिलितवत्। सर्वदलीयप्रतिनिधिमण्डलस्य सफलतायाः विषये वार्ताहरैः सह वार्तालापं कुर्वन् श्री थरूरः अवदत् यत् प्रतिनिधिमण्डलेन सिन्दूराभियानस्य विषये, तस्य आवश्यकता किमर्थम् ? इत्यस्मिन् विषये च विभिन्नेभ्यः देशेभ्यः स्वसन्देशाः प्रदत्ताः इति। आतङ्कवादं विरुध्य भारतस्य पक्षं सुदृढतया संस्थापनानन्तरं सप्तबहुदलीय-प्रतिनिधिमण्डलेषु अधुना सफलयात्रायाः समापनं कृत्वा पञ्च- प्रतिनिधिमण्डलानि भारतं प्रत्यागतानि सन्ति।

**डोनाल्ड ट्रम्प-एलेन मस्क्**

अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्प् आभियांत्रिक-महद्धनी एलेन् मस्क् इत्येतयोः मनोविभेदेन टेस्ला-संस्थायाः विपणिमूल्येषु सार्धैकशतम् बिलियन्-डालर्-तोऽधिकम् न्यूनीभूय एकदिवसीया बृहत्तमा हानिः सञ्जाताऽस्ति।

**असमजलप्रलयः**

असमराज्ये जलाप्लावस्य स्थितौ परिष्कारः अस्ति। अधुनापि षोडशमण्डलेषु प्रायः सार्द्धपञ्चलक्षाधिक-जनाः जलाप्लावेन प्रभाविताः सन्ति। अद्य प्रातः जलाप्लावेन मानवजीवनस्य हानिरिति विषये सूचनाः नागता। राज्ये जलाप्लावेन प्रभाविताः प्रायः चतुर्दशशतं यावत् ग्रामाः, ऊनविंशति शतं हेक्टेयर परिमितं यावत् सस्यक्षेत्राणि च क्षतिग्रस्तानि सन्ति। राज्यसर्वकारेण श्रीभूमि-मण्डले प्रातःकाले एव जनान् निष्कासनार्थं आपदुद्धारदलानि नियोजितानि सन्ति।

**।। इति वार्ताः ।।**